# Shri Nrisimha StotraM

# श्रीनृसिंहस्तोत्रम्

## Document Information

Text title : Shri Nrisimha StotraM

File name : nRRisiMhastotramshrIdharasvAmI.itx

Category : vishhnu, shrIdharasvAmI, stotra, dashAvatAra, pancharatna

Location : doc_vishhnu

Author : Shridharasvami

Description/comments : shrIdharasvAmI stotraratnAkara

Acknowledge-Permission: Upendra Shripad Dasare, https://shridharamrut.com

Latest update : November 8, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 13, 2022

*sanskritdocuments.org*

Shri Nrisimha StotraM

# श्रीनृसिंहस्तोत्रम्

(सुरनिम्नगा वृत्तम्)
भवनाशनैकसमुद्यमं करूणाकरं सुगुणालयं
निजभक्ततारणरक्षणाय हिरण्यकश्यपुघातिनम् ।
भवमोहदारणकामनाशनदुःखवारणहेतुकं
भजपावनं सुखसागरं नरसिंहमद्वयरूपिणम् ॥ १॥

गुरू सार्वभौममघ्र्यातकं मुनिसंस्तुतं सुरसेवितं
अतिशान्तिवारिधिमप्रमेयमनामयं श्रितरक्षणम् ।
भवमोक्षदं बहुशोभनं मुखपङ्कजं निजशान्तिदं
भजपावनं सुखसागरं नरसिंहमद्वयरूपिणम् ॥ २॥

निजरूपकं विततं शिवं सुविदर्शनायहितत्क्षणं
अतिभक्तवत्सलरूपिणं किल दारुतः सुसमागतम् ।
अविनाशिनं निजतेजसं शुभकारकं बलरूपिणं
भजपावनं सुखसागरं नरसिंहमद्वयरूपिणम् ॥ ३॥

अविकारिणं मधुभाषिणं भवतापहारणकोविन्द
सुजनैःसुकामितदायिनं निजभक्तहृत्सुविराजितम् ।
अतिवीरधीरपराक्रमोत्कटरूपिणं परमेश्वरं
भजपावनं सुखसागरं नरसिंहमद्वयरूपिणम् ॥ ४॥

जगतोऽस्य कारणमेव सच्चिदनन्तसौख्यमखण्डितं
सुविधायिमङ्गलविग्रहं तमसःपरं सुमहोज्वलम् ।
निजरूपमित्यतिसुन्दरं खलुसंविभाव्य हृदिस्थितं
भजपावनं सुखसागरं नरसिंहमद्वयरूपिणम् ॥ ५॥

पञ्चरत्नात्मकं स्तोत्रं श्रीनृसिंहस्य पावनम् ।
ये पठन्ति मुदाभक्त्या जीवन्मुक्ता भवन्तिते ॥ ६॥

॥ इति श्रीमत् परमहंसपरिव्राजकाचार्य सद्गुरू भगवान श्रीधरस्वामीमहाराजविरचितं श्रीनृसिंहस्तोत्रं सम्पूर्णम् ।

रचनाकाळः श्रीनृसिंहजन्मोत्सवः

रचनास्थळः वरदपुरम

---

*Shri Nrisimha StotraM*

pdf was typeset on November 13, 2022

Please send corrections to *sanskrit@cheerful.com*